पारिस्थितिकं परिचिन्तनम्- बृहत्संहितायाम्॥

DR. ESWARAN.E.N
Asst.Professor,Govt. Sanskrit College, Thripunithura

Submitted on: 14/09/2019 Revised on:20/09/2019 Accepted on: 23/09/2019

संस्कृतसाहित्येपारिस्थितिकंपरिचिन्तनम्इतिविषयम्अधिकृत्यचर्चाकरणेश्रीमद्वराहमिहिरविरचिता बृहत्संहिता विशेषप्राधान्यमावहति। अत एव अत्र बृहत्संहितायाः स्थानं किमिति आदौ एव चिन्तनीयं भवति। कालविधानशास्त्रं नाम ज्योतिषं षट्सु वेदाङ्गेषु अन्यतमं नेत्रस्थानीयं१ च वर्तते। ज्योतिषस्य भागद्वयं प्रमाणभागः (Astronomy) फलभागः (Astrology) च। अत्रप्रमाणं गणितस्कन्धः। फलं तु संहिता होरा चेति द्विधा। अत्र ज्योतिश्शास्त्रे संहितास्कन्धे सूर्यपितामहादीनां अष्टादशानाम् आचार्याणां संहितानां सङ्ग्रहः इत्येव वाराहीसंहितायाः महत्त्वपूर्णं स्थानम्। श्रीमदाचार्यवराहमिहिरः आदित्यदासतनयः आवन्तिकः शकद्वितीयशतकीयः त्रिस्कन्धेषु अपि कृतभूरिपरिश्रमश्चासीत्। पञ्चसिद्धान्तिका, बृहत्संहिता, समाससंहिता, बृहज्जातकम्, लघुजातकम्, बृहद्विवाहपटलम्, यात्रा इत्यादयः अनेकेग्रन्थाः तेन रचिताः सन्ति। तथापि बृहत्संहिताकारः इत्येव तस्य प्राधान्यं स्यात्। अस्यां बृहत्संहितायाम् १०६ अध्यायेषु विविधानि निमित्तान्येव प्रतिपाद्यन्ते। अत्र निमित्तं नाम लक्षणमिति व्याख्याकारः।

बृहत्संहितायां निरूपितविषयाः।

१. उपोद्घातः।
२. दैवज्ञलक्षणम्।
३. आदित्यचारम्।
४. चन्द्रचारम्।
५. राहुचारम्- ग्रहणफलम्।
६. कुजचारम्।
७. बुधचारम्।
८. बृहस्पतिचारम्।
९. शुक्रचारम्।
१०. शनिचारम्।
११. केतुचारम्।
१२. अगस्त्यचारम्।
१३. सप्तर्षिचारम्।
१४. कूर्मविभागः।
१५. नक्षत्रव्यूहः।
१६. ग्रहभक्तिः।
१७. ग्रहयुद्धम्।
१८. चन्द्रग्रहसमागमः।
१९. ग्रहवर्षलक्षणम्।
२०. ग्रहशृङ्गाटकः।
२१. गर्भलक्षणम्।
२२. गर्भधारणम्।
२३. प्रवर्षणम्।
२४. रोहिणीयोगः।
२५. स्वातियोगः।
२६. आषाढीयोगः।
२७. वातचक्रम्।
२८. सद्योवृष्टिलक्षणम्।
२९. कुसुमलता।
३०. सन्ध्यालक्षणम्।
३१. दिग्दाहलक्षणम्।
३२. भूकम्पलक्षणम्।
३३. उत्कालक्षणम्।

३४. परिवेषलक्षणम्।
३५. इन्द्रचापलक्षणम्।
३६. गन्धर्वनगरम्।
३७. प्रतिसूर्यलक्षणम्।
३८. रजोलक्षणम्।
३९. निर्घातलक्षणम्।
४०. सस्यजातकम्।
४१. द्रव्यनिश्चयः।
४२. अर्घकाण्डम्।
४३. इन्द्रध्वजलक्षणम्।
४४. नीराजनम्।
४५. खञ्जनदर्शनम्।
४६. उत्पातलक्षणम्।
४७. मयूरचित्रकम्।
४८. पुष्यस्नानम्।
४९. पट्टलक्षणम्।
५०. खड्गलक्षणम्।
५१. अङ्गविद्या।
५२. पिटकलक्षणम्।
५३. वास्तुविद्या।
५४. उदकार्गलम्।
५५. वृक्षायुर्वेदः।
५६. प्रासादलक्षणम्।
५७. वज्रलेपलक्षणम्।
५८. प्रतिमालक्षणम्।
५९. वनप्रवेशः।
६१. गोलक्षणम्।
६२. श्वलक्षणम्।
६३. कुक्कुटलक्षणम्।
६४. कूर्मलक्षणम्।
६५. छागलक्षणम्।
६६. अश्वलक्षणम्।
६७. गजलक्षणम्।
६८. पुरुषलक्षणम्।
६९. पञ्चमहापुरुषलक्षणम्।
७०. स्त्रीलक्षणम्।
७१. वस्त्रच्छेदलक्षणम्।
७२. चामरलक्षणम्।
७३. छत्रलक्षणम्।
७४. स्त्रीप्रशंसा।
७५. सौभाग्यकरम्।
७६. कान्दर्पिकम्।
७७. गन्धयुक्तिः।
७८. स्त्रीपुरुषसमायोगः।
७९. शय्यासनलक्षणम्।
८०. वज्रपरीक्षा।
८१. मुक्ताफलपरीक्षा।
८२. पद्मरागपरीक्षा
८३. मरतकपरीक्षा।
८४. दीपलक्षणम्।
८५. दन्तकाष्ठलक्षणम्।
८६. शकुन - मिश्रफलम्।
८७. शाकुने - अन्तरचक्रम्।
८८. शाकुने - शकुनरुतम्।
८९. शाकुने श्वचक्रम्।
९०. शाकुने - शिवारुतम्।
९१. शाकुने - मृगचेष्टितम्।
९२. शाकुने - गवेङ्गितम्।
९३. शाकुने- अश्वचेष्टितम्।
९४. शाकुने - गजेङ्गितम्।
९५. शाकुने - काकचरित्रम्।
९६. शाकुने - उत्तराध्यायः।
९७. पाकविचारः।
९८. नक्षत्रगुणः।
९९. तिथिकरणगुणः।
१००वैवाहिकनक्षत्रलग्ननिर्णयः।
१०१. नक्षत्रजातकम्।
१०२. राशिविभागः।
१०३. विवाहपटलम्।
१०४.गोचरफलम् ग्रहचारफलम्
१०५. नक्षत्रपुरुषव्रतम्।
१०६. उपसंहारः

ग्रहचारः वृष्ट्यादिपर्यावरणम्, भूकम्पादिप्रतिभासः, सस्यजातकम्, वास्तुविद्या, उदकार्गलम्, वृक्षायुर्वेदः, जन्तुलक्षणम्, जन्तुचेष्टातः शकुनज्ञानम्, राशिनक्षत्रादिलक्षणम् इत्यादिरीत्या परितः स्थितिशास्त्रस्य समग्रमेखलामपि स्पृशत्ययं ग्रन्थः।

बृहत्संहितायाः पारिस्थितकवीक्षणज्ञानाय कानिचिदुदाहरणानि अत्र प्रस्तूयन्ते। वराहमिहिराचार्यः गृहं तत्परिसरश्च कथं स्यादिति वास्तुविद्याध्याये संक्षेपेण वर्णयति। श्रेष्ठा प्रकृतिः कीदृशी इत्यादि प्रासादलक्षणाध्याये देवसान्निध्यस्थाननिरूपणे च प्रतिपादयति।

सलिलोद्यानयुक्तेषु कृतेष्वकृतेषु च।
स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः॥

इति सहजाः कृतकाः वा जलाशयाः आरामाश्च यत्र सन्ति तत् ऐश्वर्यप्रदं स्थानमिति भावः।

सरस्सु नलिनीछत्रनिरस्तरविरश्मिषु।
हंसासाक्षिप्तकल्हारवीचीविमलवारिषु॥
हंसकारण्डवक्रौञ्च चक्रवाकविराविषु।
पर्यन्तनिचुलच्छायाविश्रान्तजलचारिषु॥
क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वनाम्।
नद्यस्तोयांशुका यत्र शफरीकृतलोचनाः॥
फुल्लतीरद्रुमोत्तंसा सङ्गमश्रोणिमण्डला।
पुलिनाभ्युन्नतोरस्याः हंसहासश्च निम्नगाः॥
वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु।
रमन्तेदेवता:नित्यं पुरेषूद्यानवत्सु च॥

इत्यादिभिः श्लोकैः वृक्षलतादीनां, पक्षिमृगादीनां जलचारिणां वनस्य नद्याः पर्वतस्य निर्झरस्य भूमेः निम्नोन्नतत्त्वस्य च प्राधान्यं बोधयति वराहः 'देवताः रमन्ते' इत्यादिना प्रयोगेणः। 'अन्नंजगतः प्राणाः प्रावृट्कालस्य च अन्नमायात्तम्।' इति वृष्टेः प्राधान्यमुक्तम्। ततः वृष्टेः मूलं वनमित्यतः जलप्रान्तप्रदेशेषु वृक्षलतादीनां रोपणं कार्यमित्युच्यते -

प्रान्तच्छायाविनिर्मुक्ताः न मनोज्ञाः जलाशयाः।
यस्मादतो जलप्रान्तेष्वारमान् विनिवेशयेत्॥ इति।

ततः आरामनिर्माणविधिं प्रतिपादयति 'मृद्वी भूः सर्ववृक्षाणां हिता...." इत्यादिना। अत्र आदौतिलवपनं कृत्वा यदा पुष्पितं भवतितदातच्छित्वातत्र वृक्षान् रोपयेदितिनिर्देशः। ततः कीदृशवृक्षान् कदा रोपयेदित्युच्यते-

अजातशाखान्शिशिरेजातशाखान् हिमागमे।
वर्षागमे च सुस्कन्धान् यथादिक् प्रतिरोपयेत्॥ इति॥

रोपणात् पूर्वं प्रतिरोधशक्तिवर्धनाय कीटनाशकरूपेण च किञ्चिद् घृतोशीरतिलक्षोद्रविड्ङ्गक्षीर-गोमयैः लेपनं निर्मीय आमूलाग्रं लेपयेत्। देशान्तरं नीत्वा रोपणं चेनिश्चयेन लेपनीयमिति भावः।

शुचिर्भूत्वा पूजां कृत्वा एव रोपणम्।
ततः कालानुगुणं सेचनमपि कार्यम्।

तद्यथा -

सायं प्रातश्चधर्मान्ते शीतकालेदिनान्तरे।
वर्षासु च भुवश्शोषे सेक्तव्या रोपिताद्रुमाः॥ इति॥
वृक्षात् वृक्षं प्रति निचितं दूरं कल्पयित्वा रोपणम् उचितमित्युच्यते-
उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्।
स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम्॥" इति॥

नोचेत् परस्परं संस्पृशन्तः मिश्रमूलैः पीडिताश्च भूत्वा फलं सम्यक्न यच्छन्ति। अपि च पाण्डुपत्रता इत्यादि रोगः जायते। रसश्रुतिश्च भवति इति।

तदाचिकित्साकार्या इत्युक्त्वा श्लोकद्वयेन तद्व्यव्यवस्थां वर्णयति।

वृक्षबीजरक्षणं कथं ? बीजवपनं कीदृशं ? सम्यगङ्कुराय किं किं करणीयम्? सुफलार्थं किमनुष्ठेयम्? इत्यादयः विषयाः अपि सविस्तरमत्र प्रतिपाद्यन्ते।

अत्र वास्तुविद्याध्याये के के वृक्षाः गृहस्य कुत्र कुत्र स्थापनीयाः? केन स्थापनीयाः ? इत्यादयः प्रतिपाद्यन्ते। केचन अशुभवृक्षाः सन्ति चेत् तस्य अधः पुन्नागाशोकारिष्टबकुलपनसशमीशालाश्चारोपयेयुः परिहारार्थम्। कीदृशी गृहपरिस्थितिः शुभं प्रददाति इत्यत्र-

शस्तौषधिद्रुमलतामधुरासुगन्धा स्निग्धा समानसुषिरा च मही नराणाम्।
अप्यध्वनि श्रमविनोदमुपागतानां दत्ते श्रियं किमुत शाश्वतमन्दिरेषु॥ इति॥

वृक्षाणां गुणमिश्रणाय 'एतेद्रुमाः काण्डारोप्याः' इत्यादि 'बेड्डिङ्' तन्त्रमपि वराहः प्रतिपादयति। एवं वृक्षादीनां प्रामुख्यमुक्त्वा मनुष्याणाम् अनिवार्यतापूरणार्थं वृक्षच्छेदने कीदृशव्यवहारः स्यादिति इन्द्रध्वजं निमित्तीकृत्य आचार्यः सूचयति। उद्याने मार्गे देवालयादिस्थाने स्थिताः वाल्मीकवल्लीवन्दाकयुक्ताः बहुविहगालयकोटरयुताः स्त्रीसंज्ञकाश्च वृक्षाः न छेत्तव्याः इति। अपि च विहितवृक्षाणां छेदनात् पूर्वं वृक्षपूजां विधाय तस्य तदाश्रितजीवजालानां च स्वस्तिः भवतु इति, ते जीविनः अन्यस्थानं प्राप्नुवन्तु इत्यादि च प्रार्थनां कृत्वा अन्येद्युः एव छेदनं कार्यमिति। यथा-

यानीव वृक्षे भूतानि तेभ्यः स्वस्ति नमोस्तु वः।
उपहारं गृहीत्वेमं क्रियतां वा सपर्ययः॥
पार्थिवस्त्वां वरयते स्वस्ति तेस्तु नगोत्तम।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्॥ इति॥

एवमेव सुखजीवनाय भूमि-जल-वायु-आकाश-प्रकाशादीनां सकलचराचरस्य च स्वस्तिः शान्तिः निर्मलता च भवेदिति मिहिराभिप्रायः। परितः स्थितेः परिस्थितिरेव सर्वस्य सुस्थितिः इति बृहत्संहिताशयः।

टिप्पणी

1. बृ.जा-२५-३७
2. बृ. सं. ५६/३
3. बृ. सं. ५६/४-८
4. बृ. सं. २१/३
5. बृ. सं. ५५/१
6. बृ. सं. ५५/२
7. बृ. सं.५५/६
8. बृ. सं. ५५/७
9. बृ. सं. ५५/९
10. बृ. सं. ५५/१२
11. बृ.सं. ५५/१३-१६
12. बृ. सं. ५३/८४-८७
13. बृ.सं. ५३/८८
14. बृ. सं. ५५/५
15. बृ.सं. ४३/१३-१४
16. बृ.सं.४३/१७-१८